# .. sa.nkaShTanAshanaM sa.nkaTAShTakastotram ..

# ॥ સઙ્કષ્ટનાશનં સંકટાષ્ટકસ્તોત્રમ્ ॥

## Document Information

Text title : sa.nkaShTanAshanaM sa.nkaTAShTakastotram
File name : sankaShTanAshanaMsankaTAShTakaM.itx
Category : aShTaka
Location : doc_devii
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : WebD
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Description-comments : padmapurANa
Latest update : July 04, 2004
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ સઙ્કષ્ટનાશનં સંકટાષ્ટકસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ।
ધ્યાનમ્
ધ્યાયેઽહં પરમેશ્વરીં દશભુજાં નેત્રત્રયોદ્ભૂષિતાં
સદ્યઃ સઙ્કટતારિણીં ગુણમયીમારક્તવર્ણાં શુભામ્ ।
અક્ષ-સ્રગ્-જલપૂર્ણકુમ્ભ-કમલં શંખં ગદા બિભ્રતીં
ત્રૈશૂલં ડમરૂશ્ચ ખડ્ગ-વિધૃતાં ચક્રાભયાઢ્યાં પરામ્ ॥

ૐ નારદ ઉવાચ
જૈગીષવ્ય મુનિશ્રેષ્ઠ સર્વજ્ઞ સુખદાયક ।
આખ્યાતાનિ સુપુણ્યાનિ શ્રુતાનિ ત્વત્પ્રસાદતઃ ॥ ૧॥

ન તૃપ્તિમધિગચ્છામિ તવ વાગમૃતેન ચ ।
વદસ્વૈકં મહાભાગ સઙ્કટાખ્યાનમુત્તમમ્ ॥ ૨॥

ઇતિ તસ્ય વચઃ શ્રુત્વા જૈગીષવ્યોઽબ્રવીત્તતઃ ।
સઙ્કષ્ટનાશનં સ્તોત્રં શૃણુ દેવર્ષિસત્તમ ॥ ૩ ॥

દ્વાપરે તુ પુરા વૃત્તે ભ્રષ્ટરાજ્યો યુધિષ્ઠિરઃ ।
ભ્રાતૃભિઃ સહિતો રાજ્યનિર્વેદં પરમં ગતઃ ॥ ૪॥

તદાનીં તુ તતઃ કાશીં પુરીં યાતો મહામુનિઃ
માર્કણ્ડેય ઇતિ ખ્યાતઃ સહ શિષ્યૈર્મહાયશાઃ ॥ ૫॥

તં દૃષ્ટ્વા સ સમુત્થાય પ્રણિપત્ય સુપૂજિતઃ ।
કિમર્થં મ્લાનવદન એતત્ત્વં માં નિવેદય ॥ ૬॥

યુધિષ્ઠિર ઉવાચ
સઙ્કષ્ટં મે મહત્પ્રાપ્તમેતાદૃગ્વદનં તતઃ ।
એતન્નિવારણોપાયં કિંચિદ્બ્રૂહિ મુને મમ ॥ ૭॥

માર્કણ્ડેય ઉવાચ
આનન્દકાનને દેવી સઙ્કટા નામ વિશ્રુતા ।
વીરેશ્વરોત્તરે ભાગે પૂર્વં ચન્દ્રેશ્વરસ્ય ચ ॥ ૮॥

શૃણુ નામાષ્ટકં તસ્યાઃ સર્વસિદ્ધિકરં નૃણામ્ ।
સઙ્કટા પ્રથમં નામ દ્વિતીયં વિજયા તથા ॥ ૯॥

તૃતીયં કામદા પ્રોક્તં ચતુર્થં દુઃખહારિણી ।
શર્વાણી પઞ્ચમં નામ ષષ્ઠં કાત્યાયની તથા ॥ ૧૦॥

સપ્તમં ભીમનયના સર્વરોગહરાઽષ્ટમમ્ ।
નામાષ્ટકમિદં પુણ્યં ત્રિસન્ધ્યં શ્રદ્ધયાન્વિતઃ ॥ ૧૧॥

યઃ પઠેત્પાઠયેદ્વાપિ નરો મુચ્યેત સઙ્કટાત્ ।
ઇત્યુક્ત્વા તુ દ્વિજશ્રેષ્ઠમૃષિર્વારાણસીં યયૌ ॥ ૧૨॥

ઇતિ તસ્ય વચઃ શ્રુત્વા નારદો હર્ષનિર્ભરઃ ।
તતઃ સમ્પૂજિતાં દેવીં વીરેશ્વરસમન્વિતામ્ ॥ ૧૩॥

ભુજૈસ્તુ દશભિર્યુક્તાં લોચનત્રયભૂષિતામ્ ।
માલાકમણ્ડલુયુતાં પદ્મશઙ્ખગદાયુતામ્ ॥ ૧૪॥

ત્રિશૂલડમરુધરાં ખડ્ગચર્મવિભૂષિતામ્ ।
વરદાભયહસ્તાં તાં પ્રણમ્ય વિધિનન્દનઃ ॥ ૧૫॥

વારત્રયં ગૃહીત્વા તુ તતો વિષ્ણુપુરં યયૌ ।
એતત્સ્તોત્રસ્ય પઠનં પુત્રપૌત્રવિવર્ધનમ્ ॥ ૧૬॥

સઙ્કષ્ટનાશનં ચૈવ ત્રિષુ લોકેષુ વિશ્રુતમ્ ।
ગોપનીયં પ્રયત્નેન મહાવન્ધ્યાપ્રસૂતિકૃત્ ॥ ૧૭॥

॥ ઇતિ શ્રીપદ્મપુરાણે સઙ્કષ્ટનાશનં સઙ્કટાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. sa.nkaShTanAshanaM sa.nkaTAShTakastotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*